# PG – 776

**I Semester MTA Degree Examination, January 2008**
**(Integrated Course) (Semester Scheme)**
**Tourism Administration**
**SANSKRIT LANGUAGE**
**1.2 : Sanskrit Kavya Guccha**

Time: 3 Hours Max. Marks: 80

*Instructions: 1) Answer in Sanskrit/Kannada/English.*
*2) Questions I, VII, VIII should be answered in Sanskrit only.*

SECTION – A

I. समीचीनं उत्तरं चिनुत । **(1×10=10)**

1) सरस्वती शोणस्य __________ तीरे समवातरत् ।
(पश्चिमे, उत्तरे, पूर्वस्मिन्, दक्षिणे)

2) __________ हि मूलं स्वतपसाम् ।
(दया, क्षमा, करुणा)

3) अश्ववृन्दस्य मध्ये __________ वर्षदेशीयं युवानमद्राक्षीत् ।
(पञ्चदश, सप्तदश, अष्टादश, षोडश:)

4) हर्षचरित कर्ता __________ ।
(भास:, भोज:, कालिदास:, बाण:)

5) __________ मैनाक: ।
(हिरण्यनाभ:, महेन्द्रशैल:)

6) आञ्जनेयाय जानकी __________ अददात् ।
(चिन्तामणिम्, चूडामणिम्, स्फटिकमणिम्, कौस्तुभमणिम्)

7) __________ द्विरसनजननी आसीत् ।
(सिंहिका, अनला, सुरसा, जानकी)

KLESJCMTM

8) धैर्येण युक्तस्य ___________ शरीरं न विशीर्यते ।

(सत:, पुरुष:)

9) पूर्वकृतं ___________ कर्तारमनुगच्छति ।

(कर्म, पुण्य, पापं, सन्तोष:)

10) मनसस्तु पराबुद्धि: बुद्धे: ___________ परो मत: ।

(सत्वेन, धैर्येण, प्रज्ञया, अधैर्येण)

II. एकस्य उत्तरं संस्कृतभाषायां/कन्नडभाषायां वा आङ्ग्लभाषायां लिखत । **(1×10=10)**

ಬೇಕಾದ ಒಂದನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ/ ಕನ್ನಡದಲ್ಲಿ/ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸಿ.

Answer **any one** either in **Sanskrit/Kannada** or **English**.

1) बाणभट्टस्य देश, काल, कृति: अधिकृत्य प्रबन्धं लिखत ।

ಬಾಣಭಟ್ಟನ ದೇಶ, ಕಾಲ, ಕೃತಿಗಳನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.

Write an essay on the place, date and works of Bana.

2) हनुमत: सागरोल्लङ्घनं वर्णयत ।

ಹನುಮಂತನ ಸಮುದ್ರೋಲ್ಲಂಘನವನ್ನು ವರ್ಣಿಸಿ.

Describe the leap of Hanuman over the sea.

III. द्वयो: अनुवादं कृत्वा भावार्थं लिखत । **(5×2=10)**

ಎರಡನ್ನು ಅನುವಾದಿಸಿ ಭಾವಾರ್ಥವನ್ನು ವಿವರಿಸಿರಿ.

Translate and explain **(any two)**:

1) भूयोऽपि सोऽयं रघुनाथदूतश्चिच्छेद गच्छन्नेखरै: खराग्रै: ।
नृसिंहरंहा: पथि सिंहिकाङ्गं छायानिरोधादुपपन्नमन्यु: ।।

2) कल्याणि त्वद्वियोगेन तीव्रवेगेन ताम्यत: ।
राघवेन्द्रस्य दूतं मामन्यथा मास्म मान्यथा: ।।

KLE'S SNC MTIM

3) सुखस्यानन्तरं दु:खं दु:खस्यान्तरम् सुखम् ।

सुखदु:खे मनुष्याणां चक्रवत् परिवर्तत: ।।

4) इहा धनस्य न सुखं लब्ध्वा चिन्ता च भूयसी ।

लब्धनाशो यथा मृत्युर्लब्धं भवति वा न वा ।।

5) निष्प्रचारं मन: कृत्वा प्रतिष्ठाप्य च सर्वश: ।

यामयं लभते तुष्टिं सा न शक्याऽऽत्मनोऽन्यथा ।।

IV. एकस्य गद्यभागस्य अनुवादं कुरुत । **(10×1=10)**

ಒಂದರ ಗದ್ಯಭಾಗದ ಅನುವಾದವನ್ನು ಮಾಡಿರಿ.

Translate **any one** passage.

1) ब्रह्मन् न खलु सधुसेवितोऽ यं पन्था येनासि प्रवृत्त: । क्षमा हि मूलं सर्वतपसाम् । न हि कोपकलुषिता विमृशति मति: कर्तव्यमकर्तव्यम वा । कुपितस्य प्रथममन्धकारी भवति विद्या, ततो भ्रूकुटि: । रोषदोषनिषद्ये स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसं सरस्वतीम् इत्युक्त्वा पुनराह वत्से सरस्वति विषादं मा गा: । एषा त्वामनुयास्यति सावित्री विनोदयिष्यति चास्मद्विरहदु:खिताम् । आत्मजमुखकमलावलोकनावधिश्च ते शोपोऽयं भविष्यति इति ।

2) महाभाग! सर्वथास्य दुरात्मन: प्रत्यासीदति मृत्यु: तथैव मह्यमनलाभिधानाय विभीषण दुहित्रा स्वमात्रा प्रषितया भाषितं अयमपि अनार्यशीलस्तुरीयमुपायमन्तरेण न माम् आर्यपुत्रस्य समर्पयिष्यति नियतमहमपि मासादूर्ध्वं न शक्तुयां प्रणान् कृपणान् धारयिंतुमिति । एतदाकर्ण्य मारु तिः महानुभावे माभैषिस्तत्रभवतीं भवतीं वहन्नेव तूर्णमर्णवमुल्लंघ्य रघुवरचरणसरसिज समीपमुपयास्यामि मैवं माम् असमर्थं समर्थयेथा इत्यभिहितवान् ।

V. त्रयाणां सन्दर्भं सूचयत (किमपि पठ्यभागं अविहाय) **(4×3=12)**

ಮೂರರ ವಾಕ್ಯಗಳ ಸಂದರ್ಭವನ್ನು ವಿವರಿಸಿರಿ. (ಯಾವ ಪಠ್ಯವನ್ನೂ ಬಿಡದಂತೆ)

Explain with reference to context **any three** (without omitting any text)

1) अल्पीयस्यैव कालेन स ते शापशोकविरतिं वितरिष्यति ।

2) मर्षय भगवान्, अभूमिरेषा शापस्य ।

3) न केवलं मामपहरदुरात्मा कृपां च रामस्य निसर्गसिद्धाम् ।

4) मारुते प्रेरितोऽस्मि अद्य सौम्य विश्रम्य गम्यताम् ।

5) सम्प्रज्वलति सा भूय: समिद्भिरिव पावक: ।

6) न ह्यत्यन्तं धनवन्तो भवन्ति सुखिनोऽपि वा ।

KLESNCMTTM

VI. द्वयोः लघुटिप्पर्णी लिखत। (4×2=8)

ಎರಡನ್ನು ಕುರಿತು ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆಯಿರಿ.

Write short notes on **any two**:

1) सरस्वत्याः शापकारणम्
2) भोजदेवः
3) महाभारतम्
4) सुखदुःखौ

## SECTION – B

VII. अ) एतान् शब्दान् उपयुज्य **संस्कृतभाषाया** वाक्यानि रचयत। (1×5=5)

1) दृष्ट्वा
2) अद्य
3) यदा-तदा
4) आकर्ण्य
5) गन्तव्यं

आ) वाक्यदोषान् परिहरत। (1×5=5)

1) अहं देव नमति।
2) भवान् कुत्र गच्छसि ?
3) गणेश नमः ।
4) अलं साहसात्।
5) वृक्षेण फलं पतति।

VIII. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (5×2=10)

''विद्या शास्त्रं शस्त्रं च द्वे विधे प्रतिपत्तये'' इति वदति नीतिशास्त्रकारः। विद्याया द्वैविध शस्त्र विद्या, शास्त्र विद्या चेति। शस्त्रं नाम शक्ति शास्त्र नाम ज्ञानम्। विजयदशमीपर्वणि ज्ञानस्य सम्बन्धोऽस्ति। अतः शास्त्रोपासकाश्च विजयदशम्याः आचरणे कृतादराः दृश्यन्ते। इदानीं देशे आत्मकेन्द्रित चिन्तनं प्राधान्येन विराजते। अतः विद्याशक्तिश्चापि इदानीं स्वार्थसम्पादनाय एव उपयुज्यते। प्राचीनकाले एवंनासीत्।

**प्रश्नाः**

1) नीतिशास्त्रकारः किमिति वदति ?
2) शस्त्र शास्त्रं नाम किं ?
3) इदानीं कीदृशं चिन्तनं विराजते ?
4) विजयदशमीपर्वणि कस्य सम्बन्धोऽस्ति ?
5) विद्याशक्ति : किमर्थं उपयुज्यते ?

KUVEMPU SNCMTM